OPEN ACCESS

*Int. Jr. of Contemp. Res. in Multi.* *PEER-REVIEWED JOURNAL* *Volume 5 Issue 3 [May- Jun] Year 2026*

IJCRM

International Journal of Contemporary Research In Multidisciplinary

*Research Article*

# अकथितं च ( १-४-५१ ) इति शास्त्रस्य लघुशब्देन्दुशेखररीत्या समीक्षणम्

**सुकान्त कुमार बारिक**

व्याकरणविभागः राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः,आन्ध्रप्रदेशः, भारतम्।

**Corresponding Author: *** सुकान्त कुमार बारिक

**DOI:** https://doi.org/10.5281/zenodo.20831882

**सारांश**

संस्कृतजगति व्याकरणाद्विना न किमपि पदं सेत्स्यति, वाक्यस्य तु का कथा। साधु उक्तम् मुखं व्याकरणं स्मृतम्। तत्रापि महत्त्वपूर्णप्रकरणमस्ति करकम्। तत्रापि षट्कारकेषु कर्मकारकस्य महती भूमिका दरीदृश्यते। संस्कृतवाक्येषु क्रियायाः उद्देश्यं स्पष्टं कर्तुं कर्मकारकं अनिवार्यम् अस्ति। कर्तृवाच्य-कर्मवाच्ययोः (Active/Passive Voice) परिवर्तने अपि कर्मकारकस्य नियमज्ञानं विना शुद्धवाक्यरचना असम्भवा अस्ति। कर्मकारकं सम्प्रमाणं तत्र यथामति प्रतिपिपादयिष्यते।

**Manuscript Information**

- **ISSN No:** 2583-7397
- **Received:** 15-05-2026
- **Accepted:** 20-06-2026
- **Published:** 24-06-2026
- **IJCRM:**5(3); 2026: 1131-1134
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

**How to Cite this Article**

सुकान्त कुमार बारिक. अकथितं च ( १-४-५१ ) इति शास्त्रस्य लघुशब्देन्दुशेखररीत्या समीक्षणम्. Int J Contemp Res Multidiscip. 2026;5(3):1131-1134.

**Access this Article Online**

www.multiarticlesjournal.com

**कूटशब्दाः** - प्रधानाप्रधानकर्म निरुपणम्, दिकर्मकधातूनां लकारव्यवस्था,सप्रमाणं कारकज्ञानसम्पादनञ्च।


© 2026 सुकान्त कुमार बारिक. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

## 1. उपक्रमः

भगवता पाणिनिनापादान-करण- सम्प्रदान -अधिकरण-कर्म-कर्ता इति क्रमेण षट् कारकाण्यङ्गीकृतानि। ।एतदर्थं नियमाः अपि कल्पिताः। परन्तु बहुषु स्थलेषु एतेषां व्यतिक्रमो दृश्यते। प्रोक्तनियमान् विहाय वक्तुः इच्छया कारकाणां प्रयोगः दृष्टिगोरीभवति। अतः विवक्षातः कारकाणि भवन्तीति प्रवादोऽस्ति। कर्मादिषु निश्चयो नास्ति। तदुक्तं भर्तृहरिणा-

**वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।**
**स्थाल्येषा पच्यते ह्येषा विवक्षा दृश्यते यतः॥**

अर्थात् स्थाली पचति, स्थाल्या पचति, स्थाल्यां पचति इत्येवमादयः प्रयोगाः भवन्ति। अतः कारकाणि विवक्षाधीनानि सन्ति। विवक्षामाश्रित्य पाणिनिनाऽपि सूत्राणि प्रणीतानि। तेषु अकथितं च इति सूत्रमन्यतमम्। यदा अपादानत्वादिना विवक्षा तदा तु पञ्चम्याद्येव। यदा तेन रूपेणाविवक्षा किन्तु कर्मत्वेन विवक्षा तदा अकथितं च इति सूत्रेण कर्मसंज्ञा।

## 2. सूत्रार्थः

इदं संज्ञासूत्रम्। कर्मसंज्ञाविधायकं सूत्रम्। अकथितं प्रथमान्तं पदम्। च अव्ययपदम्। द्विपदात्मकं सूत्रम्। कर्तुरीप्सिततमं कर्म इति सूत्रात् कर्मपदमनुवर्तते। कारके इत्यस्य अधिकारो वर्तते। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः।

अत्र अकथितशब्दोऽसंकीर्तिपरः अविवक्षितार्थः। अत्र अप्रधानार्थकः अकथितशब्दो न गृह्यते। अप्रधानार्थकस्वीकारे गोः पयो दोग्धि, गां पयो दोग्धि इति वाक्यद्वयस्योपस्थितिः न स्यात्। यतः गोः पयो दोग्धि इत्यत्र उद्देश्याश्रयस्य पयसः प्राधान्यमस्ति, गोः अप्राधान्यम्, अविवक्षितार्थस्वीकारे अपादानस्याविवक्षापूर्वकं कर्मत्वेन विवक्षायां कर्मसंज्ञास्थले गां पयो दोग्धि इति रूपं भवति। अपादानत्वविवक्षायां गोः पयो दोग्धि इत्येवं रूपेण वाक्यद्वयस्य साधुत्वं भवति। अन्यथा गां पयो दोग्धि इत्येवम् एकं वाक्यं भविष्यति। वस्तुतः अविवक्षा द्विविधा भवति। यथा 1) प्राप्तिपूर्विका अविवक्षा, 2) अप्रातिपूर्विका अविवक्षा प्रसक्ताया अपादानत्वादिसंज्ञायाः अपादानत्वेनाविवक्षा भवति प्राप्तिपूर्विका अविवक्षा। यथा गां दोग्धि पयः इति। गोः इत्यत्र अपादानसंज्ञा प्राप्ता। अपादानस्य अविवक्षायां कर्मसंज्ञा विहिता।

अप्रसक्ताया अपादानत्वादिसंज्ञायाः अपादानत्वेनाविवक्षा भवति अप्राप्तिपूर्विका अविवक्षा। सर्वथा अपादानत्वाप्राप्तिरूपा अविवक्षा। यथा बलिं याचते वसुधाम्। अर्थात् विषयप्रसक्तिपूर्वकाविवक्षायां, सर्वथा पूर्वविधेरप्रसक्तौ च अकथितं च सूत्रस्य प्रवृत्तिर्भवतीति नागेशेनोक्तम्। उभयत्र कारकत्वव्याप्यापादानादीनां कर्मत्वेन बोधो भवति। अतः गां पयो दोग्धि इत्यत्र गोकर्मक-पयः कर्मक दोहनानुकूलव्यापारः इति शाब्दबोधो भविष्यति।

## 3. प्राचीनवैयाकरणानां मतम्

प्राचीनवैयाकरणानां मते अकथितं च इति सूत्रेण कर्मसंज्ञायां द्वितीयाविभक्तौ सम्बन्धत्वेन शाब्दबोधो भवति। यतः अकथितं च इति सूत्रेण अपादानादिकारकाणाममविवक्षायां कर्मसंज्ञा विधीयते। अतः तत्र सम्बन्धसामान्ये शेषे षष्ठी इति सूत्रेण षष्ठी प्राप्नोति। अत्र प्राप्तषष्ठीं प्रबाध्य कर्मसंज्ञा भवति। अतः कर्मणः सम्बन्धत्वेन बोधो भवतीति प्राचीनानां मतम्।

## 4. अत्र प्राचीनमतखण्डनम्

अपादानादिसंज्ञाविधायकसूत्राणामभावे सर्वत्र षष्ठीविभक्तिः प्राप्नोतीति स्वीकारे कर्मादिकारकाणां सम्बन्धत्वेन बोधः स्यात्। परन्तु कर्मादिकारकाणां न कुत्रापि सम्बन्धत्वेन बोधो दृश्यते। अतः अविवक्षास्थले अकथितं च सूत्रेण विधीयमानायाः कर्मसंज्ञायाः द्वितीयाविभक्तिः भवति। एवञ्च तस्याः द्वितीयायाः कर्मत्वेन बोधः स्वीक्रियते, न तु सम्बन्धत्वेन। कर्तुरीप्सिततमं कर्म इति सूत्रेण विधीयमानायाः कर्मसंज्ञायाः द्वितीया भवति। तस्याः अपि द्वितीयायाः कर्मत्वेन बोधो भवति। अतः कर्मणि द्वितीया इति सूत्रेण विहितायाः द्वितीयायाः वैरूप्यं न स्यात्। कर्मत्वपुरस्कारेण कर्मवाचकताविधायकत्वे सम्बन्धपुरस्कारेण कर्मवाचकता-विधायकत्वे च स्वीकारे कर्मणि द्वितीया इत्यस्य वाक्यभेदः स्यात्। एकवाक्येन वैरूप्येण च बोधो भवितुं नार्हति। अतः सम्बन्धत्वेन बोधो न भवति।

## 5. अत्र भाष्यमतम्

कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम् इति सूत्रद्वयं न करणीयम्। यतः सूत्रद्वयविषयेऽपि फलाश्रयत्वविवक्षायां अकथितं च सूत्रेण कार्यसिद्धिः स्यात्। इत्याशङ्क्य द्वयोः सूत्रयोः अभावे वारणार्थानामीप्सितः सूत्रं अपवादः स्यात्। एवञ्च अग्नेर्माणवकं वारयति इति वाक्ये माणवकस्यापि अपादानसंज्ञा स्यादिति भाष्ये समाहितम्। अकथितं च इति सूत्रेण विहितायाः कर्मसंज्ञायाः द्वितीयाविभक्तेः सम्बन्धत्वेन बोधस्वीकारे भाष्यस्याशङ्का अनुत्थिता स्यात्। दुहादीनां व्यापारद्वयार्थकत्वे गवादीनामपि फलाश्रयत्वात् कर्तुरीप्सिततमं कर्म इत्यनेन एव कर्मत्वे सिद्धे अकथितं च इति सूत्रं प्रत्याख्यातं भाष्यकृता।

अर्थात् विभागानुकूलव्यापारार्थकः दुह्धातुः। अत्र विभागः पयोनिष्ठः तदनुकूलव्यापारो गोनिष्ठः तदनुकूलो व्यापारो गोपनिष्ठः।

## 6. नटस्य गाथां श्रृणोतीति वाक्ये नटस्य कर्मसंज्ञा प्राप्नोतीति शङ्का

अप्राप्तिपूर्विका अविवक्षापक्षे प्राप्तां षष्ठीं बाधित्वा कर्मसंज्ञा विधीयते। अतः नटस्य गाथां श्रृणोति इति वाक्यघटकस्य नटस्य कर्मसंज्ञा स्यादिति शङ्का। यतः नटस्य सर्वथा अपादानादेः अप्राप्तिः।

## 7. अत्र समाधानम्

अप्राप्तिपूर्विका अविवक्षा इति पक्षे कारकस्यैव कर्मसंज्ञा भवति। न तु सम्बन्धस्य। नटस्य गाथां श्रृणोति इत्यत्र नटः न कारकम्। अतः अकथितं च इति सूत्रेण नटस्य कर्मसंज्ञा न भवति। क्रियाजनकङ्कारकम्। अत्र गाथाद्वारा श्रवणक्रियायाः जनकत्वात् नटस्य कारकत्वं समागतम्। अतः नटस्य कर्मसंज्ञा स्यादिति पुनरपि शङ्का आयाति। वस्तुतः यद्यपि नटस्य कारकत्वं सिद्धम् तथापि नटस्य कर्मणा साकमन्वयो न भवति। यतः नटस्य गाथां श्रृणोति इति वाक्यस्य नटनिः सरन्तीं गाथां श्रृणोतीत्यर्थः। नटस्य निःसरणक्रियायामन्वयो भवति। न तु कर्मणा साकम्। अकथितं च इति सूत्रेण कर्मयुक्कारकस्य कर्मसंज्ञा भवति। अत एव नटस्य कर्मसंज्ञा अकथितं च इति सूत्रेण न भवति।दुह्यादेः परिगणनान्तरं कर्मयुक् भवति। नटस्य गाथां श्रृणोति इत्यत्र दुह्यादिधातूनां योगाभावात् कर्मसंज्ञा न भवति।

## 8. नटस्य कर्मसंज्ञा स्यादिति पुनरपि शङ्का

नटस्य गाथां श्रृणोतीति वाक्ये नटनिः सृतगाथाश्रवणात् आख्यातोपयोगे इति सूत्रेण नटस्य अपादानसंज्ञा प्राप्नोति। अतः अपादानस्य अविवक्षायां प्राप्तिपूर्विका अविवक्षा भवति। अतः नटस्य अकथितं च सूत्रेण कर्मसंज्ञा स्यादिति पुनरपि शङ्का।

## 9. अत्र समाधानम्

नियमपूर्वकविद्यास्वीकारे एव आख्यातोपयोगे इति सूत्रेण अपादानसंज्ञा विधीयते। अत्र नियमपूर्वकविद्याग्रहणाभावात् आख्यातोपयोगे इति सूत्रेण अपादानसंज्ञा न भवति। अतः नटस्य कर्मसंज्ञा न स्यात्। यदि नटस्य अपादानसंज्ञा न भवति, तर्हि नटात् निःसरन्तीं गाथां श्रृणोति इत्यत्र नटशब्दात् कथं पञ्चमीति प्रश्नः समुदेति। वस्तुतः निःसरणक्रियां प्रति नटस्य अपादानत्वमस्ति, न तु श्रवणक्रियां प्रति अपादानत्वम्। अतः नटशब्दात् पञ्चमी सिद्धा। नटस्य गाथां श्रृणोति इति वाक्यघटकस्य नटस्य दुहादिपरिगणनवलेन कर्मसंज्ञा न भवति।

## 10. अकथितं च सूत्रस्य प्रवृत्तौ धातूनां परिगणनम्

**दुह्याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।**
**कर्मयुक् स्यादकथितं च तथा स्यान्नीहृकृष्वहाम्॥**

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युच्यते तदेवाकथितं कर्म इति परिगणनं कृतम्।

दुहादिषोडशधातुवाच्यव्यपारजन्यफलाश्रयप्रधानकर्म- सम्बद्धाकथि-तकारकस्य ब्रूशास्धातुद्वयतिरिक्त धात्वर्थव्यापारात् प्रागेव कर्मणः सम्बद्धत्वम्। यथा

गोः सकाशात् पयो दोग्धि इत्यत्र दुधात्वर्थदोहनव्यापारात् प्रागपि गवा साकं पयसः संबन्धः आसीत्। दोहनव्यापारस्यानन्तरमपि। ब्रूविशासिविषये तु अपादानादिकारकाणां धात्वर्थव्यापारान्तरं कर्मणा साकं योगो भवति। माणवकं धर्म ब्रूते इत्यत्र कथनान्तरं भाषणक्रियया साकं सम्प्रदानस्य अन्वयो भवति। सति सम्भवे प्राक् तत्सम्बद्धत्वमेव ग्राह्यम्। अविनीतं विनयं याचते इत्यत्र असम्भावादनन्तरमिति बोध्यम्। उभयथाकर्मयोगस्थले गां पयो दोग्धि स्थाल्यामित्यादौ स्थाल्यादेः अधिकरणत्वाविवक्षायामपि अकथितं च सूत्रेण कर्मसंज्ञा न भवति एवञ्च अपादानादिशब्देन अपादान-सम्प्रदानाधिकरणान्येव गृह्यन्ते। करणन्तु न गृह्यते। हस्तं गां पयो दोग्धि इति वाक्यं न स्यात्। वस्तुतः हस्तकरणस्य दुधात्वर्थव्यापारानन्तरमपि पयसा कर्मणा साकमन्वयो न भूत्वा गोस्तनेन अथवा दोहनक्रियया साकमन्वयो भवति।

## 11. प्रधानाप्रधानकर्मनिरूपणम्

गां दोग्धि पयः इत्यत्र अपादानत्वेन गोशब्दात् पञ्चमी प्राप्ता। किन्तु अपादानत्वेन अविवक्षायां कर्मत्वेन विवक्षया अकथितं च सूत्रेण कर्मसंज्ञा विधीयते। अत्र पयः इति प्रधानकर्म। तस्य कर्तुरीप्सिततमं कर्म इति


© 2026 सुकान्त कुमार बारिक. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

सूत्रेण कर्मसंज्ञा भवति । अत्र अप्रधानकर्म गौरिति। एवञ्च दुहादीनामेकव्यापारार्थस्वीकृतपक्षे गाम् इति गौणकर्म तथा च कर्मणि प्रत्यये गौणकर्मणि प्रत्ययत्वात् गौः दुह्यते पयः इति रूपं निष्पन्नम्। पूर्वोक्तषोडशधातूनां द्विकर्मकत्वम्। अकथितं च इति सूत्रविहितकर्मणो गौणत्वम्। पयः सम्बन्धिगोकर्मकं दोहनमित्यर्थः । द्विकर्मकधातूनां कस्मिन्कर्मणि प्रत्ययः इति जिज्ञासायामुच्यते ।

**गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।**
**बुद्धिभक्ष्यार्थयोः शब्दकर्मणाञ्च निजेच्छया ।**
**प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥**

कर्मवाच्ये दुहादीनां द्वादशधातूनां गौणे कर्मणि लकारो विधीयते । नीहृकृष्वहामिति चतुर्णां धातूनां प्रधाने कर्मणि लकारो भवति। अर्थात् गौणे कर्मणि प्रथमा, प्रधाने कर्मणि द्वितीया दुहादिधातूनां योगे। अन्येषां चतुर्णां धातूनां योगे प्रधानकर्मणि प्रथमा, गौणे कर्मणि द्वितीया स्यात्।

### 12. अत्र विषये नागेशमतम्

व्यपारद्वयार्थकत्वं स्वीकृत्य अकथितं च इति सूत्रं न दुहादिषोडशधातूनां व्यपारद्वय करणीयमिति नव्याः नागेशादयः स्वीकुर्वन्ति।

गां दोग्धि पयः इत्यत्र गौः पयस्त्यजति गवा पयस्त्याजयति इत्यर्थप्रतीत्या दुधातोः द्रवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारोऽर्थः स्वीकृतः नव्यैः । एवञ्च नव्यानां मते गवादीनामेव प्रधानकर्मत्वम्, तत्रैव कर्मणि लकारो विधीयते। प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे

कर्तृनिष्ठप्रधानव्यापारविशेषण-फलाश्रयत्वम् इति। अत्र

गोपनिष्ठदुधात्वर्थप्रधानीभूतव्यापारे विभागानुकूल-व्यापाररूपफलस्य साक्षादन्वयो भवति। एतत्फलं गोनिष्ठम् । अत एव गो भवति प्रधानकर्म। इत्थं व्यापारद्वयार्थस्वीकारेऽपि कर्मणि प्रत्यये गौः पयो दुह्यते इति प्रयोगः उपपद्यते।

### 13. गर्गाः शतं दण्ड्यन्ताम् इत्यत्र शतम् प्रधानकर्मेति शङ्का

गर्गेभ्यः शतं दण्डयति राजा इति वाक्ये गर्गस्य सम्प्रदानत्वेनाविवक्षायाम् अकथितं च इति सूत्रेण कर्मसंज्ञायां गर्गान् शतं दण्डयति इति वाक्ये गर्गान् अप्रधानकर्म शतम् भवति प्रधानकर्म। अतः शतमित्यस्य प्रधानकर्मत्वात् गर्गान् इति कर्मणः आवृत्तिर्न भवति। एवञ्च प्रत्येकगर्गेण शतात्मिका मुद्रा दण्डरूपेण देया इति भाष्योक्तिः असंगता स्यादिति शङ्का आयाति ।

### 14. अत्र समाधानम्

प्राधान्यं द्विविधं भवति। यथा 1. आर्थप्राधान्यम् 2. शाब्दप्राधान्यम् । पुत्रेण सहागतः पिता इति वाक्ये आगमनक्रियायां पितुः अन्वयात् पितुः प्राधान्यमस्ति । एतदु शब्दं प्राधान्यम्। पुत्रस्य अप्राधान्यम् ।

परन्तु पुत्रं विना पिता आगमने असमर्थः । अतः पुत्रस्य पुत्रस्य आर्थिकं प्राधान्यमित्थं शाब्दिकं प्राधान्यं गर्गकर्मनिष्ठम् । उद्देश्यत्वरूपम् आर्थप्राधान्यमित्थं शाब्दिकं प्राधान्यं गर्गकर्मनिष्ठम्। उद्देश्यत्वरूपम् आर्थप्राधान्यं शतकर्मनिष्ठम्। तथा च भाष्ये उक्तम्। अर्थिनश्च राजानो हिरण्येन भवन्ति, न प्रत्येकं दण्डयति। अतः उद्देश्यत्वरूपार्थिकप्राधान्यपक्षे भाष्योक्तिः संगच्छते एवञ्च कर्मणि प्रत्यये गर्गाः शतं दण्ड्यन्ताम् इत्यत्र गर्गाणां प्राधान्यात् गर्गकर्मणः उक्तत्वात् प्रथमा सिद्धा।

### 15. शकारमसि चोदितः इति वाक्यस्य साधुत्वप्रदर्शनम्

मत्त्वः त्वं शकारं चोदयसि इति वाक्ये मत्तः इत्यस्यापादानत्वेन अविवक्षायां कारकत्वेन च विवक्षायाम् अकथितं च इति सूत्रेण कर्मसंज्ञायां मां त्वं शकारं चोदयसि इति वाक्यं सम्पन्नम्। जिज्ञासाज्ञापनं ण्यन्तस्य चोदयतेरर्थः। व्यापारद्वयार्थकपक्षे

ज्ञानानुकूलव्यापारानुकूलव्यापारार्थः चोदयतेः (चोदिधातोः)।

एकव्यापारार्थकपक्षे शकारम् भवति प्रधानकर्म, व्यापारद्वयार्थकपक्षे माम्, शकारं च प्रधानकर्म, परन्तु शाब्दं प्राधान्यं युष्मदर्थनिष्ठम् । अतः कर्मणि प्रत्यये प्रधानकर्मणः उक्तत्वात् शकारमसि चोदितः इति प्रयोगः उपपद्यते। चोदितः इत्यत्र कर्मणि क्तप्रत्ययः।

### 16. द्विकर्मधातूनां कर्मणिलकारव्यवस्था

एकव्यापारार्थकत्वे गवादीनामकथितं च सूत्रेण कर्मसंज्ञा भवति। एवञ्च आदिकर्मभिन्नत्वात् अप्राधान्यादेव अर्थात् गौणे कर्मणि लकारव्यवस्था क्रियते।व्यापारद्वयार्थकत्वे तु प्रधानकर्मणि लकारव्यवस्था। अत एव उक्तम्

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः कर्मणः।। ॥

### 17. गां दोग्धि पयः इत्यत्र पञ्चमीद्वितीयाषष्ठीनां व्यवस्था

यद्यपादानत्वेन गवादेः विवक्षा तदा पञ्चम्येव । यथा गोः पयो दोग्धि। यदा कर्मत्वेन विवक्षा तदा द्वितीयैव। यथा गां पयो दोग्धि इति। यदा क्षीरान्वयि-सम्बन्धप्रतियोगित्वेन विवक्षा तदा षष्ठ्येव । द्विकर्मसु गवादीनां कर्मत्वाविवक्षया क्रियान्वये षष्ठी विभक्तिः न भवति अनभिधानात् (प्रयोगाभावात्)। अर्थात् सर्वत्र षष्ठ्यन्तार्थस्य क्रियान्वयविविक्षायां षष्ठ्यभावः इति तु नियमो नास्ति । क्वचिदेव इति मनसि निधाय नागेशः समाधत्ते यत् स्वान्वय-योग्यनामार्थेऽन्वये सम्भवति षष्ठ्यर्थस्य क्रियान्वयोऽव्युत्पन्नः इति वचनानुसारेण क्रियायां सम्बन्धत्वेनान्वयविवक्षायां षष्ठी न भवति । तेन मातुः स्मरतीत्यादौ षष्ठीप्रयोगे न दोषः। षष्ठ्यन्तपदोपस्थाप्यस्य क्रियया द्रव्येण च उभयत्र अन्वयसंभावनायां द्रव्ये एव अन्ययो भवति। न तु क्रियायाम्। षष्ठ्यन्तपदोपस्थाप्यार्थस्य स्वसमभि-व्याहृतस्वान्वययोग्यद्रव्ये अन्वयो भवति। अतः तण्डुलानामोदनं पचति इत्यत्र तण्डुनामिति षष्ठ्यन्तपदोपस्थाप्यार्थः विक्लित्याश्रये ओदने अन्वेति, न तु पाकक्रियायाम् । अत एव कर्तृरीप्सिततमं कर्म इति सूत्रे भाष्ये द्वयर्थश्चैव पचिः विकारयोगे षष्ठी इत्युक्तम्। अर्थात् विक्लितिः विक्लित्यनुकूलव्यापारश्च पच्धात्वर्थः। तण्डुलानामोदनं पचतीत्यत्र विक्लित्याश्रये अन्वयात् षष्ठी भवति ।

### 18. सूत्रस्योदाहरणम्

द्विकर्मकाणां षोडशधातूनां योगे अपादानादिकारकाणामविवक्षायां कर्मसंज्ञा भवति। षोडशधातूनां कृते षोडशोदाहरणानि प्रदर्शितानि सिद्धान्तकौमुद्याम् । तद्यथा -

**1. दुह्**

अपादानाद्यविवक्षायाम् - -गां दोग्धि पयः ।

अपादानादिविवक्षायाम् -गोः पयः दोग्धि ।

कर्मवाच्ये - गौः दुह्यते पयः ।

**2.याच्**

बलिं याचते वसुधाम् ।
बलेः वसुधां याचते ।
बलिः वसुधां याच्यते ।

**3.पच्**

तण्डुलान् ओदनं पचति ।
तण्डुलैः ओदनं पचति ।
तण्डुलाः पच्यन्ते ओदनम् ।

**4.दण्ड्**

शतं गर्गान् दण्डयति।
गर्गेभ्यः शतं दण्डयति।
गर्गाः शतं दण्ड्यन्ते।

**5.रुधि**

व्रजम् अवरुणद्धि गाम्।
व्रजे अवरुणद्धि गाम्।
व्रजोऽवरुद्ध्यते गाम्।

**6.प्रच्छि**

माणवकं पन्थानं पृच्छति।
माणवकात्पन्थानं पृच्छति।
माणवकः पन्थानं पृच्छयते।

**7. चिञ्**

वृक्षोऽवचीयते फलानि ।
वृक्षम् अवचिनोति फलानि।
वृक्षात् अवचिनोति फलानि।

**8.ब्रू**

माणवकं धर्मं ब्रूते।
माणवकाय धर्मं ब्रूते।
माणवको धर्मम् उच्यते।

**9.शास्**

माणवकं धर्मः शास्ति।


© 2026 सुकान्त कुमार बारिक. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

माणवकाय धर्मः शास्ति।

माणवको धर्मः शिष्यते।

**10.जि**

शतं जयति देवदत्तम्।
शतं जयति देवदत्तात्।
शतं जीयते देवदत्तः।

**11.मथ्**

सुधां क्षीरनिधिं मथ्नाति।
सुधायै क्षीरनिधिं मथ्नाति भवति।
सुधां क्षीरनिधिर्मथ्यते।

12.मुष्

देवदत्तं शतं मुष्णाति।
देवदत्तात् शतं मुष्णाति।
देवदत्तः शतं मुष्यते।

**13.नी**

ग्रामम् अजां नयति।
ग्रामे अजां नयति।
ग्रामम् अजा नीयते।

**14.हृ**

ग्रामम् अजां हरति।
ग्रामे अजां हरति।
ग्रामम् अजा ह्रियते।

**15.कृष्**

ग्रामम् अजां कर्षति।
ग्रामे अजां कर्षति।
ग्रामम् अजा कृष्यते।

**16.वह**

ग्रामम् अजां वहति।
ग्रामे अजां वहति।
ग्रामम् अजा उह्यते।

प्रश्नादेव ज्ञानस्य अपायो न भवति, पृष्टोऽसौ यदाचष्टे तदा अपाये न युज्यते।

अतः अप्राप्तिपूर्विका अविवक्षा। दुहादिधातूनां व्यापारद्वयार्थकत्वं स्वीकृत्य अकथितं च सूत्रं प्रत्याख्यातमेव ।

## सहायक ग्रन्थ सूची


1. अमरसिंहः. *अमरकोशः*. वाराणसी: चौखम्बा संस्कृतसंस्थानम्; 2001।
2. *ऋग्वेदसंहिता*. वेङ्गालुरु: श्रीअरविन्दकपालीशास्त्री इन्स्टिट्यूट ऑफ् वैदिक कल्चर।
3. मम्मटः. *काव्यप्रकाशः*. दिल्ली: भारतीयविद्याप्रकाशनम्; 1993।
4. भामहः. *काव्यालङ्कारः*. रमानन्दाचार्यः सम्पादितम्. वाराणसी: चौखम्बा संस्कृत सीरीज्।
5. वामनाचार्यः. *काव्यालङ्कारसूत्राणि*. झा वेणीशङ्करः, द्विवेदीः, सम्पा. वाराणसी: चौखम्बा संस्कृतसंस्थानम्; 2009।
6. दण्डी. *काव्यादर्शः*. गुप्तः धर्मेन्द्रकुमारः, दासः महेशचन्द्रः, सम्पा. देहली; 1973।
7. राजशेखरः. *काव्यमीमांसा*. रायः गङ्गासागरः, सम्पा. वाराणसी: चौखम्बा विद्याभवनम्; 2000।
8. जयदेवः. *चन्द्रालोकः*. त्रिपाठी श्रीकृष्णमणिः, सम्पा. वाराणसी: चौखम्बा सुरभारती प्रकाशनम्; 1997।
9. गङ्गादासः. *छन्दमञ्जरी*।
10. द्विवेदी इच्छारामः. *दूतप्रतिवचनम्*. दिल्ली: देववाणी परिषद्; 1989।
11. भरतमुनिः. *नाट्यशास्त्रम्*. द्विवेदी पार्श्वनाथः, सम्पा. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; 1992।
12. ईश्वरचन्द्रः. *अष्टाध्यायी*. वाराणसी: चौखम्बा पब्लिशर्स।
13. त्रिपाठी जयशङ्करलालः. *काशिकान्यासपदमञ्जरी संस्कृत-भावबोधिनी हिन्दीटीकासहिता*. वाराणसी: तारा पब्लिकेशन्स।
14. मिश्रः नारायणः. *काशिकावृत्तिः न्यासपदमञ्जरीसहिता*. वाराणसी: रत्ना पब्लिकेशन्स।
15. *न्यासः अथवा काशिकाविवरणपञ्चिका*।
16. पुल्लेलरामचन्द्रुडुः. *पदमञ्जरी*. हैदराबाद्: संस्कृत अकादमी, उस्मानिया विश्वविद्यालयः।
17. सदाशास्त्री गुरुप्रसादः. *महाभाष्यम् प्रदीपोद्योतराजलक्ष्मीटीकासहितम्*. नईदिल्ली: प्रतिभा प्रकाशनम्।
18. *महाभाष्यम् प्रदीपोद्योतसहितं छायाटीकोपेतञ्च*. वाराणसी: चौखम्बा संस्कृतप्रतिष्ठानम्।
19. मिश्रः विद्यानिवासः. *वैयाकरणभूषणम्*. वाराणसी: भारतीयविद्याप्रकाशनम्।
20. *वैयाकरणभूषणसारः*. वाराणसी: चौखम्बा संस्कृतप्रतिष्ठानम्।
21. युधिष्ठिरमीमांसकः. *व्याकरणशास्त्रस्य इतिहासः*. भागः 1।



**Creative Commons (CC) License**

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-Commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.


**About the Author**




**सुकान्तकुमारबारिकः** राष्ट्रियसंस्कृतविश्वविद्यालयस्य तिरुपतिस्थितव्याकरणविभागस्य शोधकर्ता अस्ति। तस्य रुचिः व्याकरणशास्त्रे, संस्कृतभाषायां, भारतीयज्ञानपरम्परायां च वर्तते। सः अनुसन्धानकार्येषु, शास्त्रीयलेखनस्य विकासे, संस्कृतसाहित्यस्य संवर्धने च सक्रियतया संलग्नः अस्ति।



© 2026 सुकान्त कुमार बारिक. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/